# Ganapati Stuti Naradakrita

# નારદકૃતા ગાણપતિસ્તુતિઃ

## Document Information

Text title : Ganapati Stuti Naradakrita

File name : gANapatistutiHnAradakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 24 | 5.24. 36-44||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# નારદકૃતા ગાણપતિસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

નારદ ઉવાચ ।

સર્વાઙ્ગે ચન્દનાલેપો રક્તચન્દનસંયુતઃ ।

શમીમન્દારમાલા ચ તેષાં હસ્તે ગલે ભવેત્ ॥ ૩૬॥

સદા ગણેશનામ્નશ્ચ શ્રવણે તત્પરાઃ સ્મૃતાઃ ।

કીર્તને ભાવસંયુક્તાઃ ગાણપત્યા ઇમે બુધાઃ ॥ ૩૭॥

દ્વન્દ્વસ્ય ભાવો હૃદિ નોભવેત્ કદા યે નિઃસ્પૃહા યોગધરાઃ સુનિર્મલાઃ ।

ગાણેશ્વરા વન્દનશીલકાઃ સદા તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૩૮॥

નિત્યં સ્વધર્મેણ ચ સંયુતાસ્તથા ન માનયન્તિ હ્યપવર્ગકં કદા ।

ભક્તૌ નિમગ્ના ગણરાજવર્ત્મનિ તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૩૯॥

ન સ્થાનગેહાદિકમાશ્રયન્તિ યે પ્રારબ્ધમાત્રેત્યવલમ્બિનોઽપરે ।

ચિન્તામણૌ ચિત્તનિવેશકાઃ સદા તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૦॥

શ્રૌતે તથા સ્માર્તભવે સુકર્મણિ સંસક્તદેહા ગણરાજસિદ્ધયે ।

સર્વાણિ કર્માણિ સમર્પ્ય નૈજપે તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૧॥

નિન્દાં સ્તુતિં વીક્ષ્ય વિકારવર્જિતાઃ કાન્તાસુવર્ણાદિષુ ભાવહીનકાઃ ।

પ્રાટન્તિ વિઘ્નેશ્વરભક્તિલાલસા તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૨॥

આચ્છાદિતા યે ન ચ કેન ભાવિતાસ્તિરસ્કૃતા દેવવરિષ્ઠભોજિનઃ ।

જીવૈર્હતા દોષવિહીનચેતસસ્તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૩॥

નેચ્છન્તિ કૈલાસવિકુણ્ઠકાદિકં ન બ્રહ્મભૂયં ન રસાં રસાતલમ્ ।

ભક્તિં સદેચ્છન્તિ ગણેશભાવિકાન્ તાન્ ગાણપત્યાન્ પ્રવદન્તિ યોગિનઃ ॥ ૪૪॥

ઇતિ નારદકૃતા ગાણપતિસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૨૪ । ૫.૨૪। ૩૬-૪૪॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 24 . 5.24. 36-44..

Proofread by Yash Khasbage, Preeti Bhandare

*Ganapati Stuti Naradakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*